## मुख्यवार्ता:-

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य आर्. जे. डी. पक्षस्य, काङ्ग्रेस्-पक्षस्य च उपरि प्रहारं कुर्वता, बिहारप्रदेशं प्रवासिनां प्रदेशः कृतः इत्युक्तम्। तेन बिहारस्य सीवान-नगरे प्रायः पञ्च- सहस्र-नवशत- कोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासः उद्घाटनञ्च कृतम्।
- अद्यारभ्य सिक्किम्-राज्यस्य नाथुला-क्षेत्रात् समारब्धायां वार्षिक-कैलाश-मानसरोवर-यात्रायां षड्त्रिंशत् तीर्थयात्रिकाणां अधिकारिणां च प्रथमः समूहः कैलास्-मानसरोवर्-प्रदेशं प्रति यात्रार्थं तिब्बताख्यं स्वायत्त-प्रदेशं प्रविष्टवान्।
- पश्चिम-एशियायाः स्थितिं यथाशीघ्रतया सामान्यीकर्तुम् ईरान्-देशस्य विदेशमन्त्रिणः जिनेवा-नगरे जर्मनी, फ़्रान्स्, यू. के. देशानां विदेशमन्त्रिभिः सह मेलनस्य कार्यक्रमः अद्य अस्ति।
- भारतीय-ऋतुविज्ञान-विभागेन अस्य मासस्य पञ्चविंशति- दिनाङ्कपर्यन्तं वायव्य-मध्यभारतयोः केषुचित् भागेषु प्रचण्डतोप्यधिक वर्षायाः पूर्वानुमानं कृतमस्ति।
- क्रिकेट्-क्रीडायां, भारत-इङ्ग्लेण्ड्-देशयोः मध्ये तेण्डुल्कर्-एण्डर्सन्-ट्रोफीति-निकषस्पर्धायाः प्रथम-क्रीडा लीड्स्-नगरस्य हेडिङ्ग्ले-क्रीडाङ्गणे प्रचलति।

## पी.एम् बिहार-परियोजना

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य आर्. जे. डी. पक्षस्य, काङ्ग्रेस्-पक्षस्य च उपरि प्रहारं कुर्वता, ते बिहारप्रदेशं प्रवासिनां प्रदेशः इति कृतवन्तः इत्यारोपः कृतः। सः अवदत् यत् एन्. डी. ए. इति प्रशासनेन राज्यमिमं पुनः विकासस्य मार्गे आनीतम्। श्रीमोदी सीवाननगरे जनसभां सम्बोधयन् इत्यपि आरोपितवान् यत् राज्यस्य युवकाः केवलं बिहारस्य दुर्दशायाः विषये एव श्रुतवन्तः, पूर्वतनस्य शासनकाले राज्ये कथं कुशासनम् आसीत् इति ते न जानन्ति। सः बिहारस्य जनान् आश्वासितवान् यत् तस्य सर्वकारः राज्यस्य विकासाय निरन्तरं कार्यं करिष्यति। अस्मिन् विषये बिहारराज्यं अतीव महत्त्वपूर्णां भूमिकां निर्वहति इति सः अवदत्।

तत्पूर्वं, प्रधानमन्त्रिणा नरेन्द्रमोदिना बिहारस्य सीवान-नगरे प्रायः पञ्च- सहस्र-नवशत- कोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासः उद्घाटनञ्च कृतम्। प्रधानमन्त्रिणा बिहार-उत्तरप्रदेशयोर्मध्ये चतुश्शत- कोटिरूप्यकाणां नूतन-वैशाली-डियोरिया-रेल्-मार्ग-परियोजना इत्यपि समर्पिता। श्रीमोदी पाटलीपुत्र-गोरखपुर्-नगरयोर्मध्ये वंदेभारत्-एक्स्प्रेस्-रेल्-यानस्य च ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्। नमामि-गङ्गे परियोजनान्तर्गतं अष्टादशशत- कोटिरूप्यक-मूल्यात्मकानि षट् मलजलशुद्धीकरणकेन्द्राणि अपि श्रीमोदी प्रदेशाय समर्पितवान्।

## राष्ट्रपतिः/ उत्तराखण्डपरिभ्रमणम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मूवर्या जीवनस्य सर्वेषु क्षेत्रेषु दिव्यांजनानां प्रोत्साहनस्य महत्त्वम् उक्तवती। सा अवोचत् यत् अधुना उन्नतप्रौद्योगिकीनां साहाय्येन दिव्यांजनाः प्रभावीरूपेण मुख्यधारायाम् योगदानं दातुं सक्षमाः सन्ति। अद्य राष्ट्रपतिः देहरादूननगरे दृष्टिबाधितानां सशक्तीकरणाय राष्ट्रियसंस्थायां छात्रान् सम्बोधयन्ती आसीत्। तत्पूर्वं, राष्ट्रपतिः देहरादूननगरे राष्ट्रपति-निकेतन इत्यस्य, राष्ट्रपति-तपोवनस्य च उद्घाटनम् अकरोत्।

**कैलाश-मानसरोवरयात्रा/ सिक्किम**

अद्यारभ्य सिक्किम्-राज्यस्य नाथुला-क्षेत्रात् वार्षिकी कैलाश-मानसरोवर-यात्रा समारब्धास्ति। राज्यपालः ओमप्रकाशमाथुरेण यात्रायाः ध्वजप्रदर्शनपूर्वकं शुभारम्भो विहितः। षड्त्रिंशत् तीर्थयात्रिकाणां अधिकारिणां च प्रथमः समूहः कैलास्-मानसरोवर्-प्रदेशं प्रति यात्रार्थं तिब्बताख्यं स्वायत्त-प्रदेशं प्रविष्टवान्। नाथुला-क्षेत्रस्य अपरपार्श्वे चीन-देशस्य अधिकारिणः तेषाम् स्वागतार्थं उपस्थिताः आसन्। ध्यातव्यमस्ति यत् प्रथमदलाय यात्रां समाप्य गङ्गटोक्-नगरं प्रत्यागन्तुं एकादशतः द्वादश- दिनानां समयः अपेक्षते।

**इरान्-इस्रेल्-सङ्घर्षः**

पश्चिम-एशियायाः स्थितिं यथाशीघ्रतया सामान्यीकर्तुम् अद्य ईरान्-देशस्य विदेशमन्त्रिणः अब्बास् अराघ्ची इत्यस्य जिनेवा-नगरे जर्मनी, फ्रान्स्, यू. के. देशानां विदेशमन्त्रिभिः सह मेलनस्य कार्यक्रमः अस्ति। प्रसारमाध्यमानां सूचनानुसारं, ईरानस्य विदेशमन्त्रिणा सह परमाणु-संवादात् प्राक् त्रयाणां यूरोपीय-राष्ट्राणां मन्त्रिस्तरीय-प्रतिनिधिदलस्य प्रथमतया जिनेवा-नगरे जर्मनी-देशस्य स्थायी-मिशन् इति मध्ये यूरोपीय-सङ्घस्य शीर्ष-कूटनीतिज्ञेन काजा कल्लस् इत्यनेन सह मेलनं भविष्यति। अग्रिमे सप्ताहे हेग् इति नगरे नेटो इति नेतृणां शिखरसम्मेलनात् पूर्वम् कूटनीतीप्रयासः महत्त्वपूर्णः उपायः इत्यपि मन्यते, यत्र क्षेत्रे सुरक्षा कार्यसूच्यां शीर्षस्थाने भविष्यति।

**भारतीय- ऋतुविज्ञान-विभागः**

भारतीय-ऋतुविज्ञान-विभागेन अस्य मासस्य पञ्चविंशति- दिनाङ्कपर्यन्तं वायव्य-मध्यभारतयोः केषुचित् भागेषु प्रचण्डतोप्यधिक वर्षायाः पूर्वानुमानं कृतमस्ति। अद्य दिल्ली, हरियाणा, चण्डीगढ, उत्तराखण्ड, उत्तरप्रदेश, बिहार, राजस्थान, गुजरात, मध्यप्रदेश, ओडिशा, कोङ्कण, गोवा, पूर्वोत्तरभारतस्य केषुचित् भागेषु च पृथक्-पृथक् स्थानेषु प्रचण्डवृष्टिः भविष्यति इति ऋतुविज्ञानविभागेन पूर्वानुमितमस्ति। उत्तरप्रदेशस्य अधिकांशमण्डलेषु गतचतुर्विंशति होरासु वृष्टिः अभवत्। गुजरातराज्येऽपि वर्षैषा राज्यस्य अधिकांशं भागं व्याप्य अग्रे अगच्छत्। प्रचण्डवृष्ट्या स्थानीयाः नद्यः द्रुततया प्रवहन्तः सन्ति, राज्ये पञ्चदश-जलबन्धाः अतिसञ्चेतनायां, दशजलबन्धाश्च सञ्चेतनायां सन्ति।

**योगदिवसः-देशः**

संस्कृति-मन्त्रालयेन एकादशः अन्ताराष्ट्रिय-योग-दिवसः आचर्यते। यत्र सम्पूर्णे देशे शततमेषु प्रतिष्ठित पर्यटनाधारितेषु गन्तव्यस्थलेषु, पञ्चाशदधिकेषु सांस्कृतिक-स्थलेषु च योग-सत्राणां आयोजनं क्रियते। एते श्वस्तनीयाः निर्धारिताः कार्यक्रमाःसन्ति, प्रामुख्येन आयुष्-मन्त्रालयेन विशाखापत्तन इत्यत्र प्रधानमन्त्रिणः उपस्थितौ एकः विशेषयोगोत्सवः समायोज्यते।

**शिवराज/सहकारिणाम् अन्ताराष्ट्रियवर्षः**

केन्द्रीयकृषिमन् त्री शिवराजसिंहचौहानः अद्य उक्तवान् यत् भारतस्य मृत्तिकायां सहस्रवर्षेभ्यः सहकार्यस्य भावना गभीररूपेण निहितास्ति। सः अवदत् यत् सार्वभौमिककल्याणस्य भावना भारतस्य नाडीसु धावति भावनैषा सहकार्यस्य एव सारः अस्तीति सः अन्ताराष्ट्रिय-सहकारिवर्षावसरे मुम्बईय्यां आयोजितं राष्ट्रियगोष्ठीं सम्बोधयन् आसीत्। श्रीचौहानेन केन्द्रेण आरब्धाः विविधाः योजनाः प्रकाशिताः, येषां उद्देश्यं कृषि-आय-सम्वर्धनं, कृषि-सम्बद्ध-उद्योगानाम् माध्यमेन कृषकाणां आय-सम्वर्धयितुं, स्थायि-कृषेः माध्यमेन पारिस्थितिकि-सन्तुलनञ्च निर्वाहयितुम् अस्ति।

**भारत-इङ्ग्लैण्ड्-क्रिकेट्-निकषस्पर्धा**

क्रिकेट्-क्रीडायां, भारत-इङ्ग्लेण्ड्-देशयोः मध्ये तेण्डुल्कर्-एण्डर्सन्-ट्रोफीति-निकषस्पर्धायाः पञ्च-क्रीडा-श्रृङ्खलायाः प्रथम-क्रीडा लीड्स्-नगरस्य हेडिङ्ग्ले-क्रीडाङ्गणे प्रचलति, यत्र इङ्ग्लेण्ड्-देशीयेन दलेन पणकं विजित्य प्रथमक्रीडनाय भारताय अवसरो दत्तः। जलपानावकाशं यावत् भारतेन द्वयोः क्रीडकयोः हानौ द्विनवति धावनाङ्काः रचिताः।

**।। इति वार्ता: ।।**